International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 337-340
© 2020 IJSR
www.anantaajournal.com
Received: 08-07-2020
Accepted: 23-08-2020

**डा. टि. उमेशः**
**सहाचार्यःए मीमांसाविभागः**
**श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,**
**तिरुपतिः, आंध्र प्रदेशः, भारत**

**Corresponding Author:**
**डा. टि. उमेशः**
**सहाचार्यःए मीमांसाविभागः**
**श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,**
**तिरुपतिः, आंध्र प्रदेशः, भारत**

# मीमांसाशास्त्रप्रतिपादितधर्मस्वरूपविचारः

## डा. टि. उमेशः

## प्रस्तावना

**"धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मेसर्वंप्रतिष्ठितं तस्मात् धर्मं परमं वदन्ति"** [1] इत्यादिना धर्मस्य जगदुत्पत्तिस्थितिकारणत्वं सर्वश्रेयस्करीश्रुतिः प्रतिपादयति। अमुमेव श्रुत्यर्थं स्मृतिकाराः अपि परमकारुणिकाः महर्षयः **"धारणात् धर्मं इत्याहुः धर्मो धारयते प्रजाः"** इत्यादिना धर्मानुष्ठानप्रवृत्तिसिध्यर्थम् उपदिदिषुः।

**"वेदोऽखिलो धर्ममूलम्"** [2] इत्यतः लोके सुविदितमेवैतत् समेषां जनानां सुखावाप्तिः दुःखनिवृत्तिश्च वेदोक्तधर्माचरणेन सम्भवतीति। तत्र धर्माचरणे प्रवृत्तिसिध्यर्थं प्राचीनैः ऋषिभिः वेदतत्वार्थप्रतिपादकानि नैकानि शास्त्राणि प्रणीतानि। तेषु भगवता जैमिनिना श्रुत्यर्थनिर्णयार्थं, वेदतत्वप्रतिपादनार्थं प्रणीतं द्वादशस्वध्यायेषु सूत्रेणोपनिबद्धं पूर्वमीमांसाशास्त्रम् अन्यतमम्।

धर्माधर्मनिरूपणमेव शास्त्रस्यास्य प्रयोजनमिति निरूपितं वार्तिके **"धर्माख्यंविषयं वक्तुं मीमांसायाः प्रयोजनम्"** इति। तत्र शास्त्रारम्भप्रतिज्ञावसरे **"अथाऽतो धर्मजिज्ञासा"** [3] इत्यनेन सूत्रेण वेदस्य अर्थज्ञानरूपदृष्टप्रयोजन सिध्यर्थं स्वाध्यायविध्यनुसारेण शास्त्रस्यास्याध्ययनमवश्यं कर्तव्यम् इति साधितमस्ति। केवल अक्षरग्रहणमात्रेण साङ्गप्रधानकर्मानुष्ठानसिद्धिः न भवति इति च स्पष्टं निरूपितं भाष्यकारेण। यथा **"दृष्टो हि तस्यार्थः कर्मावबोधकंनाम न हि तदध्ययनमात्रेण भवन्तो याज्ञिकाः फलं समामनन्ति"** इति। तदेवानुवर्तितं भाट्टदीपिकाकारेण

यथा **"स्थाणुरयं भारहारः खिलाभूदधीत्य वेदं न विजानाति योऽर्थम्"** इति।

धर्मो जिज्ञासितव्यः इति सिद्धे द्वितीये धर्मलक्षणं प्रमाणञ्च सूत्रयामास **"चोदना लक्षणोऽर्थो धर्मः"** इति। **"वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः"** [4], **"वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः"** [5] इति लक्षणपरिष्कारः। वेदप्रतिपाद्यत्वे सति श्रेयस्साधनताकत्वे सति अर्थत्वं धर्मत्वमिति यावत्। धर्मजिज्ञासायाः आवश्यकताविषये भाष्यकारः एवम् अभिप्रेति। तद्यथा-**"धर्मं प्रति हि विप्रतिपन्नाः बहुविदः, केचिदन्यं धर्ममाहुः केचिदन्यम्। सोऽयमविचार्य प्रवर्तमानः कश्चिदेवोपाददानो**

**विहन्येत, अनर्थं च ऋच्छेत्। तस्मात् धर्मो जिज्ञासितव्यः"** [6] इति।

तथा च मतान्तरेषु धर्मशब्दप्रयोगः विभिन्नेष्वर्थेषु दृश्यते इति प्रदर्शयितुं "**केचिदन्यं धर्ममाहुः**" इत्याह भाष्यकारः। मतान्तरेषु यथा -

- तत्र सांख्यैः अन्तः करणस्य मनसः वृत्तिविशेषः यागाद्यनुष्ठानजन्यः धर्मः इत्युक्तः ।
- शाक्याः चेतसः ज्ञानस्य ज्ञानान्तरजन्या वासना धर्मः इत्याहुः।
- आर्हताः कार्यारम्भकान् पुद्गलसंज्ञकान् परमाणून् धर्मः इति निरूपयन् ।
- वैशेषिकाः आत्मनो विशेषगुणः धर्मः इत्यवदन्।
- प्राभाकराः अपूर्वं यागजन्यं फलजनकं पुण्यविशेषं धर्ममाहुः। यथोक्तं प्रकरणपञ्चिकायां शालीकनाथाचार्येण "**अपूर्वं कार्यं वेद वाक्यानामर्थः**" [7] इति।

तदेवोक्तं वार्तिके -

**"अन्तःकरणवृत्तौ वा वासनायां च चेतसः।**
**पुद्गलेषुच पुण्येषु नृगुणेऽपूर्वजन्मनि"** [8] ।। इति

तत्र यद्यपि पूर्वोक्तप्रकारेण धर्मशब्दस्य अन्तः करणवृत्यादि नानार्थकत्वेपि वेदे न तेष्वर्थेषु धर्मशब्दः प्रयुक्तः दृश्यते। अपि च तेषां श्रेयस्साधनत्वं वेदेन ज्ञातुं न शक्यते इति कृत्वा न तत्र श्रुतिप्रामाण्यवादिभिः धर्मशब्दप्रयोगः अङ्गीक्रियते। अत एवोक्तं वार्तिके -

**"प्रयोगो धर्मशब्दस्य न दृष्टः न च साधनम्।**
**पुरुषार्थस्य ते ज्ञातुं शक्यन्ते चोदनादिभिः"** [9] ।। इति

वेदैकप्रमाणगम्यः प्रमेयभूतः धर्मस्वरूपः विचारशास्त्रे "**तस्यनिमित्त परीष्टिः**" [10] इति सूत्रेण सम्यक्परीक्ष्यैव प्रतिपादितः इति अत्रत्यः विशेषः। अतः यजेतस्वर्गकामः इत्यादिषु यागादिक्रियाणां वेदबोधितत्वात् श्रेयः – स्वर्गादिफलसाधनत्वाच्च उक्त धर्मलक्षणम् अत्र सङ्गच्छते।

मीमांसकमते धर्मो नाम यागादिक्रियारूपः। तथाच "**धर्मेण पापमपनुदति, धर्मं चर**" [11] इत्यादि श्रुतिवाक्येषु धर्मशब्दप्रयोगः यागादिरूपक्रियाविशेषे एव प्रयुक्तः दृश्यते। तत्र भगवती श्रुतिरपि तदेव प्रमाणयति। यथा - "**यज्ञेन यज्ञमयजन्तदेवाः तानि धर्माणि प्रथमान्यासन्**" [12] इति। तथा च "**यो हि यागमनुतिष्ठति तं धार्मिकः इति समाचक्षते**" [13] इति भाष्यवचनमपि यागादिक्रियारूपाणामेव धर्मत्वं समर्थयति।

अतः"**य एव श्रेयस्करः स एव धर्म शब्देनोच्यते**" [14] इत्यादि भाष्यवचनमादृत्य साक्षात् परम्परया वा वेदेन श्रेयस्साधनत्वावच्छिन्नत्वविशिष्ठत्वेन प्रतिपादितानां यागदानादिक्रियाणाम्, व्रीह्यादिद्रव्याणाम्, आरुण्यादिगुणानाञ्च धर्मशब्दवाच्यत्वम् इति ज्ञेयम्।

तत्र द्रव्यगुणक्रियादीनाम् ऐन्द्रियविषयकत्वेपि श्रेयस्साधनतारूपेण धर्मत्वं साधितम्। न तेषां इन्द्रियविषयत्वेन धर्मत्वम् इति। तच्च उक्तं **न ताद्रूप्येण धर्मता** इत्यादिना कुमारिलभट्टपादैः वार्तिके। यथा

**"श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः।**
**चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता"**।।[15] इति
**"द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते।**
**तेषामैन्द्रियकत्वेपि न ताद्रूप्येण धर्मता"**।।[16]
**"श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते।**
**ताद्रूपेण तु धर्मत्वं तस्मान्नेन्द्रिय गोचरः"**।।[17] इति

अतस्सिद्धम् वेदबोधिता, श्रेयस्साधनता च यस्य यस्मिन् वा वर्तते स एव धर्मः इति।

वेदबोधित अग्निहोत्रादेः धर्मत्वं चैत्यवन्दनादेः अधर्मत्वमिति धर्मस्वरूपविवेचनानन्तरम् अलौकिके अतीन्द्रिये धर्मे किं प्रमाणमिति जिज्ञासायां "**धर्मे सामान्यतः सिद्धे प्रमाणं चोदनोच्यते**" [18] इत्यादिना चोदनैवप्रमाणं चोदनाप्रमाणमेव इत्यवधारणद्वयम् अङ्गीकृत्य "**चोदनालक्षणोऽर्थो धर्मः**" इत्येकेनैव सूत्रेण धर्मलक्षणं, स्वरूपञ्च श्रुत्यर्थाभ्यां प्रदर्शितं भगवता जैमिनिना।

अत्र चोदनैव प्रमाणं इत्यादिना प्रत्यक्षादिप्रमाणान्तराणां निरासः। चोदनाप्रमाणमेव इत्यादिना अप्रामाण्यकारणानां भ्रमसंशयादीनां निरासः इत्यवगन्तव्यः।

चोदनाशब्दस्य अर्थविवेचनावसरे भाष्यकारः एवमाह

"**चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः**" [19] इति ।

चोदना च शब्दरूपा। चोदनाजन्यज्ञानं कालान्तरे पुरुषान्तरेऽवस्थान्तरे देशान्तरे वा न वितथं भवति।

शब्दे प्रामाणस्य औत्सर्गिकत्वात्, शब्दश्च अत्यन्तासत्यपि शशविषाणादेः ज्ञानमु- त्पादयति। अत एव प्रकृते चोदनायाः धर्मज्ञानजनकत्वात् उत्सर्गतः प्राप्तं प्रामाण्यं दोषाभावात् अनपोदितं भवति।

तदित्थं निरूपितं वार्तिके यथा-

**"अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।**

**तेनोत्सर्गे स्थिते तस्य दोषाभावात्प्रमाणतः"**।।[20] इति

उक्त धर्मलक्षणे अर्थपदसार्थक्यनिरूपणावसरे "श्येनादिषु फलतः अधर्मत्वं, स्वरूपतः धर्मत्वं" कथं भवति इति प्रतिपाद्यते। तत्र "श्येनेनाभिचरन् यजेत" इत्यादिभिः वेदवाक्यैः श्रेयस्साधनत्वेन विहितत्वात् न श्येनादीनां स्वरूपतः अधर्मत्वम्। वेदबोधितत्वात् तेषां अर्थपदेन स्वरूपतः व्यावृत्यभावात्। किन्तु "**मा हिंस्यात् सर्वभूतानि**", इत्यादि निषेध शास्त्रेण तेषां फलभूता हिंसायाः निषिध्दत्वेन फलद्वाराऽधर्मत्वं भवति। अत एव भाष्यकारेण "**कोऽनर्थः यः प्रत्यवायाय श्येनवज्रइषु इत्येवमादिः** इत्युपक्रम्य **हिंसा हि सा सा च प्रतिषिध्दा**" [21] इत्यादिना उपसंहारः कृतः। श्येनादिषु हिंसा द्विधा प्रवर्तते । फलहिंसा - अङ्गहिंसाचेति। तत्र फलहिंसायाः निषिध्दत्वेनाधर्मत्वम्। अङ्गहिंसायास्तु श्येनादेः ज्योतिष्टोमविकृति भूतत्वात् प्रकृतिवद्विकृतिः कर्तव्या इत्यतिदेशेन प्राप्तत्वात् विधिवाक्यत्वेन निषेधविषयत्वाभावेन धर्मत्वमेव। अतः श्येनादिषु नैव स्वतः धर्मत्वं नाप्यधर्मत्वम् किन्तु हिंसारूपफलद्वारैव तेषामनर्थत्वेन अधर्मत्वं न तु साक्षात् ।

तदुक्तं वार्तिककृता कुमारिलभट्टेन -

**"अतः स्वतो न धर्मत्वं श्येनादेर्नाप्यधर्मता।**

**फलाऽनर्थानुबन्धित्वात् तद्वारेणोपचर्यते"**।।[22] इति

वेदविहित अग्नीषोमीयपशुहिंसायामधर्मत्वं नास्ति तत्प्रयोजकनिषिध्दस्याभावात्। यद्यपि "**मा हिंस्यात् सर्वभूतानि**" इति हिंसा निषेधकसामान्यशास्त्रसत्वेऽपि "अग्नीषोमीयं पशुमालभेत" इति विशेषशास्त्रेण सामान्यशास्त्रस्य दुर्बलत्वात् अग्नीषोमीयपशुहिंसायां निषेधशास्त्रस्य अप्रवृत्या तेषां धर्मत्वमेव न तु अधर्मत्वम्। आगमे क्रतुहिंसायाः अर्थत्वेनैव प्रतिपादनात्। तथा च हिंसायाः अपि क्रतुबाह्यायाः एव प्रत्यवाय जनकत्वम्। क्रतुहिंसायाः करणेतिकर्तव्यतारूपायाः प्रत्यवायजनकत्वं नास्ति। यागीयाङ्ग हिसात्वात् तत्र न कश्चित्प्रत्यवायः इति सिध्दम्।

अत्र धर्मलक्षणोऽक्त अर्थपदेन वेदविहितश्रेयस्साधनीभूतज्योतिष्टोमादिषु यथा प्रवृत्तिः तथैव प्रत्यवायसाधनीभूत श्येनादिषु निवृत्तिरपि सिध्यति इति कृत्वा प्रवर्तकत्वं निवर्तकत्वम् उभयमपि चोदनया सूत्रितम्।

तदर्थमेवोक्तं वार्तिककारेण-

**"प्रवृत्तौ वा निवृत्तौ वा या शब्दश्रवणेन धीः।**

**सा चोदनेति सामान्यं लक्षणं हृदयेस्थितम्"**।।[23] इति

अत्र अधर्मस्य जिज्ञासा प्रयोजनं तु तस्य हानाय धर्मविरुध्दः अधर्मः, अर्थस्य धर्मत्वे सिध्दे तद्विरुध्दस्य अनर्थस्य निषेधस्य अधर्मत्वं अर्थात् सिध्यति इति चोदना शब्दस्य विधेयनिषेधोभयपरत्वं धर्मलक्षणसूत्रेण साधितम्। अत्र धर्मशब्दः अधर्मस्याप्युपलक्षकः तस्यापि हानाय जिज्ञास्यत्वात्। अतस्सिध्दं वेदबोधितत्वे सति श्रेयस्साधनताकत्वे सति अर्थत्वं धर्मत्वम्। तद्विरुधश्च अधर्मत्वमिति।

सन्दर्भ


1. तै.उ - प्र - 4
2. म.स्मृ - 2.6
3. श्लो.वा - प्र.सू 1.1.1
4. जै.सू - 1.1.1
5. जै.सू - 1.1.2
6. अ.सं - पृ.सं - 10
7. न्या.प्र - पृ.सं - 1
8. शा.भा - पृ.सं - 6
9. प्र.पं - पृ.सं - 417
10. श्लो.वा - चो.सू - 194
11. श्लो.वा - चो.सू - 196
12. जै.सू - 1.1.5

13. तै.उ - प्र - 1
14. तै.आ - प्र - 3
15. शा.भा - पृ.सं - 13
16. शा.भा - पृ.सं - 13
17. श्लो.वा - चो.सू - 191
18. श्लो.वा - चो.सू - 13
19. श्लो.वा - चो.सू - 14
20. श्लो.वा - चो.सू - 1
21. शा.भा- पृ.सं १०
22. श्लो.वा - चो.सू - 6
23. शा.भा - पृ.सं १५
24. श्लो.वा - चो.सू २६६
25. श्लो.वा - चो.सू २२०